# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| कक्षा- शास्त्री-२ (SEM-3) | प्रश्नपत्र-७ | गुणा: - ७० |
| विषय:- वास्तुशास्त्रम् | CE235 | समय: - ०३ त: ०६ |
| दिनाङ्क: - ०१/१२/२०१६ | सन्दर्भग्रन्थ: -वास्तुराजवल्लभ: | |

॥ प्रथमान्विति: ॥

**प्र-१ द्वयो: व्याख्या कार्या ।** ०८

१. आनन्दं वो गणेशार्कविष्णुगौरीमहेश्वरा: ।
देवा: कुर्यु: श्रियं सौख्यमारोग्यत्वं गृहे सदा ॥

२. वास्तुपूजाविहीनश्च सूत्रधारैर्विना तथा ।
सप्तजन्म भवेत्कुष्ठी स कर्ता नरकं व्रजेत् ॥

३. हस्तात्मकं क्षेत्रफलं गजाहतं संवत्सरैर्भाजितलब्धकं यत् ।
तत्खेन्दुगुण्यं भवनस्य जीवितं यच्छेषकं भूतहतं विलीयते ॥

**प्र-२ आयादिलक्षणं विस्तारेण लिखतु ।** ०८

**अथवा**

**वास्तुलक्षणं विशदं वर्णयत ।**

**प्र-३ द्वयो: टिप्पणीं लिखतु ।** ०४

१. भूपरिक्षा ।
२. वास्तु-उत्पत्ति कथा ।
३. आयानां स्वरूपम् ।
४. देवानां विन्यास: ।

**प्र-४ पञ्चानाम् उत्तरं लिखतु ।** ०५

१. मङ्गलाचरणे केषां देवानां वर्णनं वर्तते ?
२. गृहनिर्माणप्रयोजनं किम् ?
३. ६४ वास्तुपदमण्डलं कुत्र प्रयुज्यते ?
४. ८१ (एकाशीति) वास्तुपदमण्डलं कुत्र प्रयुज्यते ?
५. आय कति ? के च ते ?
६. वास्तुपुरुषस्य उत्पत्ति: कदा अभवत् ?
७. राशी कति ? के च ते ?

॥ द्वितीयान्विति: ॥

**प्र-५ द्वयो: व्याख्यां कार्या ।** ०८

१. विद्याधरीकोष्ठकयोश्च मध्ये बाहुप्रमाणं शररामहस्तम् ।
पञ्चाधिकं पञ्चकरेण हीनमितित्रिधा वास्तुमतो हितञ्च ॥

२. देवालयं वा भवनं मठश्च भानो: करैर्वायुभिरेव भिन्नम् ।
तन्मूलभूमौ परिवर्ज्जनीयं छाया गता यस्य गृहस्य कूपे ॥

३. प्राक् पश्चिमे मारुतवह्निकोणे प्रोक्ता प्रवीणैरपि नृत्यशाला ।
वर्च्योगृहं रात्रिचरस्य कोणे प्राक्पश्चिमे भोजनशालिका च ॥

**प्र-६ एकस्योपरि परिचयात्मकम् उत्तरं लिखतु ।** **०८**

१. राजगृहनिवेशादि वर्णनं लिखतु ।

२. दुर्गपुरविचार: विस्तारेण लिखतु ।

**प्र-७ द्वयो: टिप्पणीं लिखन्तु ।** **०४**

१. कुण्डनिर्माणविचार: ।

२. सरोनामानि ।

३. द्वारविचार: ।

४. हयशाला ।

**प्र-८ पञ्चानाम् उत्तराणि लिखतु ।** **०५**

१. शुभद्रुमाणां नामानि लिखन्तु ।

२. स्वल्पराष्ट्रा अपरं नाम किम् ?

३. कुण्डनिर्माणे कति द्वाराणि भवन्ति ?

४. वाण्या: कति भेदा: ?

५. देवानां मुखं पूर्वे शुभं न वा ?

६. त्रिकोणनगरस्य फलं किम् ?

७. उत्तमनगरे कति मार्गं करणीयम् ?

**॥ तृतीयान्विति: ॥**

**प्र-९ द्वयो: व्याख्या कार्या ।** **०८**

१. सर्वाणि ध्रुववद्भवन्ति नितरां षड्दारुकै: सुन्दरम् ।
प्रोक्तं तद्वरदं च भद्रकुमुदेऽथो वैमुखाख्यं शिवम् ॥

२. मेघं गृहं चैव मनोरमं च सुभद्रसंज्ञं कथिता च संख्या ।
इत्येकशालानि गृहाणि विद्याच्छतं च चत्वार्यधिकं ध्रुवादि ॥

३. सूर्यद्विशालं लघुरस्य वामे मुखे त्रिकं दक्षिणतस्तथेक: ।
वेदा मुखे वासवमेव गेहं वामेऽपसव्ये लघुरेक एव ॥

**प्र-१० चतुश्शालगृहलक्षणं विशदं लिखतु ।** **०८**

**अथवा**

**द्विशालगृहलक्षणं विशदं वर्णयत ।**

**प्र-११ एकस्योपरि टिप्पणीं लिखतु ।** **०२**

१. प्रभवादि गृहषोडश: ।

२. सोमादि गृहषोडश: ।

**प्र-१२ द्वयो: अतिलघूत्तरं लिखत ।** **०२**

१. शाला अर्थात् किम् ?

२. प्रस्तारप्रयोजनम् ।

३. चतु:शाला कीदृशी ?

४. षडध्यायस्य संज्ञा का ?